.. ambAnavamaNimAlA ..

॥ अम्बानवमणिमाला ॥

वाणीं जित सुखदाणीं अलिकुल वेणीं भवाम्बुधित्रोणीम् ।
वीणां सुखशिशुपा?ग्णिं नत कीर्वाणीं नमामि सर्वाणीम् ॥ १॥
कुवलय दल नीलाङ्गीं कुवलयाक्षैक दीक्षित पाङ्गीम् ॥
लोचन विजित कुरङ्गीं मातङ्गीं नौमि शङ्करार्धाङ्गीम् ॥ २॥
कमला कमलज कान्ता कलसारसदत्त कान्त करकमलकं ।
करयुगल विद्धत कमलां विमलां कमलाङ्ग चूड सकलकलाम् ॥ ३॥
सुन्दर हिमकर वदनां कुन्द सुरतनां मुकुन्द निधि सदनाम् ।
करुनोज्जिवित मदनां सुर कुसलय सुरेशु कृत कदनाम् ॥ ४ ॥
तुङ्ग स्तन जित कुम्भां कृत परिरम्भां शिवेन गुह दिम्भाम् ।
धरित शुम्भ निशुम्भां नर्तित रम्भां पुरो विगदम्बाम् ॥ ५॥
अरुणाधर जित बिम्बां जगदम्बां गमन विजि कडम्बाम् ।
पालित सुजन कडम्बां पृतुल निदम्बां भजे सहेरम्भाम् ॥ ६॥
शरणागत जनभरणां करुणा वरुणालयां नवावरणाम् ।
मणिमय दिव्यभरणां शरणाम्भोजध सेवकोत्तरणाम् ॥ ७॥
नथ जन रक्षां दक्षां प्रत्यक्ष दैवताद्यकाहाम् ।
वर्ही कृत हर्यक्षां क्षपि दवि पक्षां सुरेषु कृत रक्षाम् ॥ ८॥
धन्यां सुरवमान्यां हिमगिरितनयां त्रिलोक मूर्धन्याम् ।
विहृत सुरद्रुमवन्यां वेद्मि विन त्वां न देवतास्वन्याम् ॥९ ॥
एतां नवमणिमालां पतन्ति भक्त्येह ये परासक्त्याः ।
तेषां वदने सदने नृत्यति वणि रमा च परम मुदा ॥१० ॥
पातय वा पाताले स्थापय वा सकल भुवन साम्राज्ये ।
मातस्तव पाद युगलं नाहं मुञ्चामि नैव मुञ्चामि ॥११ ॥

Encoded by Maniam Varagoor maniamvaragoor at yahoo.com
and corrected by Sunder Hattangadi sunderh at hotmail.com

Please send corrections to sanskrit@cheerful.com
Last updated October 3, 2010
http://sanskritdocuments.org